सिद्धे इच्छाभावात् ब्रह्मणः सद्धत्वेन इष्यमाणत्वाभावात् वेदप्रतिपाद्यत्वेऽपि नातिव्याप्तिरिति बोध्यम्। ५चोदनाविषये यागादिप्रयत्ने च। "एकं वा संयोगरूपचोदनाऽख्याऽविशेषात्" जै॰ सू॰। "कर्मैक्यप्रतिपादका संयोगरूपचोदनासंज्ञारूपाः पदार्थास्तेषामविशेषादैक्यम्। "तत्र चोदना प्रवर्त्तकः शब्दः चोदितप्रयत्नो वा" रत्नप्रभा। [ङः। कन्दुके त्रिका॰।

**चोदनागुड** पु॰ चोदनया नोदनया गुड्यते गुर-क रस्य

**चोद्य** न॰ चुद-ण्यत्। १प्रश्ने २पूर्वपक्षे च अमरः ताभ्यां हि उत्तरदानाय प्रवर्त्तनात् तयोस्तथात्वम्। "चोद्यं वा परिहारोवा क्रियतां द्वैतभाषया। अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरम्" वेदान्तका॰। ३आक्षेप्ये च "चपलाजनं प्रति न चोद्यमदः" माघः। "चोद्यं चोदनीयम् कथमित्याक्षेप्यम्" मल्लि॰ "सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च" भा॰ उ॰ ४२अ॰। ४अद्भुते ५प्रेरणार्हे त्रि॰। "नित्योत्थिता गुरुकर्म्मस्वचोद्याः" भा॰ अनु॰ १०२अ॰।

**चोपन** न॰ चुप-ल्युट्। १मन्दगमने, २तूष्णीम्भवने, ३मौने च।

**चोर** पु॰ चुर-अच्। १स्तेयकर्त्तरि परद्रव्यापहारके शब्दर॰। २गन्धद्रव्यभेदे, हेमच॰ ३क्षणशय्यायां हड्डचन्द्रः। ब्राह्मणा॰ कर्म्मणि ष्यञ्। चौर्य्यं तत्कर्म्मणि परद्रव्यापहरणे। "सा च द्रव्यवशा कुतस्तव धनं द्यूतेन चौर्य्येण वा चौर्य्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य काऽन्या गतिः" उद्भटः। चोरस्य भावः मनोज्ञा॰ वुञ्। चौरिका चोरभावे स्त्री। ४कविभेदे पु॰ कविरमरुः कविरमरः कवी चोरमयूरकौ" उद्भटः। तत्कृतग्रन्थश्च चोरपञ्चाशिका"। तत्र चौर्य्यपदार्थो निर्णीय प्रदर्श्यते। परमात्मस्वत्ववद्द्रव्यहरणमेव चौर्य्यं तेन साधारणधनापहारे न चौर्य्यम्। यथाह दायभागे "य एव हि परस्येदमिति विशेषं जानानः परस्वे स्वत्वहेतुमन्तरेणैव स्वत्वमारोपयति स स्तेन इति लोकप्रसिद्धोऽर्थः न चात्रेदं परकीयम् इदं वा ममेति विवेक्तुं शक्नोति द्रव्यस्याविभक्तत्वात्। यथा यदेव हि ममेदमिति विशेषं जानानः परस्वत्वापत्तये स्वामी त्यजति, परश्च विशेषेणेदं ममेति स्वत्वं मन्येति तत्रैव दाननिष्पत्तिः। न च साधारणधने तथा सम्भवतीति साधारणधनमदेयमुक्तं तथा स्तेयमपि नैतन्मम धनं परस्येदमिति जानत एव भवतीति न साधारणधनापहारे स्तेयनिष्पत्तिः"। "परद्रव्यहरणं स्तेयमिति परशब्दात् आत्मीयत्वव्यवच्छेदेनैव परकीयत्वस्यावगमात् साधारणासाधारणयोश्चासाधारणस्यैव शीघ्रप्रतीतेः। चोरचौर्य्यभेदलक्षणदण्डभेदादिकं च वीरमित्रोदये दर्शितं यथा।

"मनुः स्यात्साहसं त्वन्वयवत् प्रसभङ्कर्म यत् कृतम्। निरन्वयम्भवेत् स्तेयं हृत्वापह्नूयते च यदिति" अस्यायमर्थः। अन्वयवद्द्रव्यरक्षकराजाद्यध्यक्षादिसमक्षं बलावष्टम्भेन यत्परधनापहरणादिकं क्रियते तत् साहसम्। स्तेयं पुनर्निरन्वयं स्वाम्याद्यसमक्षं यद्वञ्चयित्वा परधनाद्यपहरणं तदुच्यते। यच्च राजाद्यध्यक्षादिसमक्षमपहृत्य न मयेदं कृतमिति भयान्निह्नूयते तदपि स्तेयमिति। अतएव नारदः "उपायैर्विविधैरेषां छलयित्वाऽपकर्षणम्। सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिणः" इति॥ एवामित्येतत् क्षुद्रादिनिर्देशान्तस्तान्याह स एव "मृद्भाण्डासनखट्वास्थिदारुचर्मतृणादि यत्। शमीधान्यं कृतान्नञ्च क्षुद्रं द्रव्यमुदाहृतम्। वासः कौषेयवर्ज्जञ्च गोवर्जं पशवस्तथा। हिरण्यवर्ज्जं लोहञ्च मध्यं व्रीहियवादि च। हिरण्यरत्नकौषेयस्त्रीपुङ्गोगजवाजिनः। देवब्राह्मणराज्ञाञ्च विज्ञेयन्द्रव्यमुत्तममिति"। बलात्कारकृतमपहरणं साहसान्तर्गतं स्तेयमित्याह स एव "तस्यैव भेदः स्तेयः स्याद्विशेषस्तत्र तूच्यते। आधिः साहसमाक्रम्य स्तेयमाधिस्छलेन तु" इति। तस्यैव साहसस्यैव। आधिः पीड़ा धनापहरणादिद्वारा आक्रम्य प्रसह्य परस्य क्रियमाणः क्लेशः साहसरूपं स्तेयम्। छलेन क्रियमाण आधिः केवलस्तेयमित्यर्थः। तस्करज्ञानोपायमाह याज्ञवल्क्यः "ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथ पदेन वा। पूर्वकर्मापराधी च तथा चाशुद्धवासकः। अन्येऽपि शङ्कया ग्राह्या जातिनामादिनिह्नवैः। द्यूतस्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः। परद्रव्यगृहाणाञ्च पृच्छका गूढचारिणः। निराया व्ययवन्तश्च विनष्टद्रव्यविक्रयाः" इति। ग्राहकैराजपुरुषैर्लोप्त्रेणापहृतभाजनादिना, अशुद्धवासः अप्रज्ञातस्थानवासी। जातिनिह्नवो नाहं शूद्र इत्येवंरूपः। नामनिह्नवो नाहं डित्थ इत्येवंरूपः। आदिग्रहणात् स्वदेशग्रामकुलाद्यपलापेन च लक्षिता ग्राह्याः। द्यूतपण्याङ्गनामद्यपानादिष्वतिप्रसक्ताः तथा कुतोऽसि त्वमिति चोरग्राहिभिः पृष्टो यदि शुष्कमुखोभिन्नस्वरो